श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ पञ्चदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चदशः सर्गः ॥

## राजाज्ञया श्रीराममानेतुं सुमन्त्रस्य तद्भवने गमनम्

ते तु तां रजनीमुष्य ब्राह्मणा वेदपारगाः।
उपतस्थुरुपस्थानं सह राजपुरोहिताः ॥ **2.15.1** ॥

अमात्या बलमुख्याश्च मुख्या ये निगमस्य च।
राघवस्याभिषेकार्थे प्रीयमाणाः सुसङ्गताः ॥ **2.15.2** ॥

उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि।
लग्ने कर्कटके प्राप्ते जन्म रामस्य च स्थिते ॥ **2.15.3** ॥

अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितम्।
काञ्चना जलकुम्भाश्च भद्रपीठं स्वलङ्कृतम् ॥ **2.15.4** ॥

रथश्च सम्यगास्तीर्णो भास्वता व्याघ्रचर्मणा।
गङ्गायमुनयोः पुण्यात् सङ्गमादाहृतं जलम् ॥ **2.15.5** ॥

याश्चान्याः सरितः पुण्या ह्रदाः कूपाः सरांसि च।
प्राग्वहाश्चोर्ध्ववाहाश्च तिर्यग्वाहाश्च क्षीरिणः ॥ **2.15.6** ॥

ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः।
क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥ **2.15.7** ॥

अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः।
सजलाः क्षीरिभिश्छन्ना घटाः काञ्चनराजताः ॥ **2.15.8** ॥

पद्मोत्पलयुता भान्ति पूर्णाः परमवारिणा।
चन्द्रांशुविकचप्रख्यं पाण्डुरं रत्नभूषितम् ॥ **2.15.9** ॥

सज्जं तिष्ठति रामस्य वालव्यजनमुत्तमम्।
चन्द्रमण्डलसङ्काशमातपत्रं च पाण्डुरम् ॥ **2.15.10** ॥

सज्जं द्युतिकरं श्रीमदभिषेकपुरस्सरम्।
पाण्डुरश्च वृषः सज्जः पाण्डुराश्वश्च संस्थितः ॥ **2.15.11** ॥

वादित्राणि च सर्वाणि वन्दिनश्च तथापरे।
इक्ष्वाकूणां यथा राज्ये सम्भ्रियेताभिषेचनम् ॥ **2.15.12** ॥

तथाजातीयमादाय राजपुत्राभिषेचनम्।
ते राजवचनात् तत्र समवेता महीपतिम् ॥ **2.15.13** ॥

अपश्यन्तोऽब्रुवन् को नु राज्ञो नः प्रतिवेदयेत्।
न पश्यामश्च राजानमुदितश्च दिवाकरः ॥ **2.15.14** ॥

यौवराज्याभिषेकश्च सज्जो रामस्य धीमतः।
इति तेषु ब्रुवाणेषु सर्वांस्तांश्च महीपतीन् ॥ **2.15.15** ॥

अब्रवीत् तानिदं वाक्यं सुमन्त्रो राजसत्कृतः।
रामं राज्ञो नियोगेन त्वरया प्रस्थितो ह्यहम् ॥ **2.15.16** ॥

पूज्या राज्ञो भवन्तश्च रामस्य तु विशेषतः।
अयं पृच्छामि वचनात् सुखमायुष्मतामहम् ॥ **2.15.17** ॥

राज्ञः सम्प्रतिबुद्धस्य चानागमनकारणम्।
इत्युक्त्वान्तःपुरद्वारमाजगाम पुराणवित् ॥ **2.15.18** ॥

सदा सक्तं च तद् वेश्म सुमन्त्रः प्रविवेश ह।
तुष्टावास्य तदा वंशं प्रविश्य स विशाम्पतेः॥ **2.15.19** ॥

शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत।
सोऽत्यासाद्य तु तद् वेश्म तिरस्करणिमन्तरा॥ **2.15.20** ॥

आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवम्।
सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि॥ **2.15.21** ॥

वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते।
गता भगवती रात्रिरहः शिवमुपस्थितम्॥ **2.15.22** ॥

बुद्ध्यस्व राजशार्दूल कुरु कार्यमनन्तरम्।
ब्राह्मणा बलमुख्याश्च नैगमाश्चागतास्त्विह॥ **2.15.23** ॥

दर्शनं तेऽभिकाङ्क्षन्ते प्रतिबुद्ध्यस्व राघव।
स्तुवन्तं तं तदा सूतं सुमन्त्रं मन्त्रकोविदम्॥ **2.15.24** ॥

प्रतिबुद्ध्य ततो राजा इदं वचनमब्रवीत्।
राममानय सूतेति यदस्यभिहितो मया॥ **2.15.25** ॥

किमिदं कारणं येन ममाज्ञा प्रतिवाह्यते।
न चैव सम्प्रसुप्तोऽहमानयेहाशु राघवम्॥ **2.15.26** ॥

इति राजा दशरथः सूतं तत्रान्वशात् पुनः।
स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तम्॥ **2.15.27** ॥

निर्जगाम नृपावासान्मन्यमानः प्रियं महत्।
प्रपन्नो राजमार्गं च पताकाध्वजशोभितम्॥ **2.15.28** ॥

हृष्टः प्रमुदितः सूतो जगामाशु विलोकयन्।
स सूतस्तत्र शुश्राव रामाधिकरणाः कथाः॥ **2.15.29** ॥

अभिषेचनसंयुक्ताः सर्वलोकस्य हृष्टवत्।
ततो ददर्श रुचिरं कैलाससदृशप्रभम्॥ **2.15.30**॥

रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभम्।
महाकपाटपिहितं वितर्दिशतशोभितम्॥ **2.15.31**॥

काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणम्।
शारदाभ्रघनप्रख्यं दीप्तं मेरुगुहासमम्॥ **2.15.32**॥

मणिभिर्वरमाल्यानां सुमहद्भिरलङ्कृतम्।
मुक्तामणिभिराकीर्णं चन्दनागुरुभूषितम्॥ **2.15.33**॥

गन्धान् मनोज्ञान् विसृजद् दार्दुरं शिखरं यथा।
सारसैश्च मयूरैश्च विनदद्भिर्विराजितम्॥ **2.15.34**॥

सुकृतेहामृगाकीर्णमुत्कीर्णं भक्तिभिस्तथा।
मनश्चक्षुश्च भूतानामाददत् तिग्मतेजसा॥ **2.15.35**॥

चन्द्रभास्करसङ्काशं कुबेरभवनोपमम्।
महेन्द्रधामप्रतिमं नानापक्षिसमाकुलम्॥ **2.15.36**॥

मेरुशृङ्गसमं सूतो रामवेश्म ददर्श ह।
उपस्थितैः समाकीर्णं जनैरञ्जलिकारिभिः॥ **2.15.37**॥

उपादाय समाक्रान्तैस्तदा जानपदैर्जनैः।
रामाभिषेकसुमुखैरुन्मुखैः समलङ्कृतम्॥ **2.15.38**॥

महामेघसमप्रख्यमुदग्रं सुविराजितम्।
नानारत्नसमाकीर्णं कुब्जकैरपि चावृतम्॥ **2.15.39**॥

स वाजियुक्तेन रथेन सारथिः
समाकुलं राजकुलं विराजयन्।

वरूथिना राजगृहाभिपातिना
 पुरस्य सर्वस्य मनांसि हर्षयन् ॥ **2.15.40** ॥

ततः समासाद्य महाधनं महत्
 प्रहृष्टरोमा स बभूव सारथिः।
मृगैर्मयूरैश्च समाकुलोल्बणं
 गृहं वरार्हस्य शचीपतेरिव ॥ **2.15.41** ॥

स तत्र कैलासनिभाः स्वलङ्कृताः
 प्रविश्य कक्ष्यास्त्रिदशालयोपमाः।
प्रियान् वरान् राममते स्थितान् बहून्
 व्यपोह्य शुद्धान्तमुपस्थितौ रथी ॥ **2.15.42** ॥

स तत्र शुश्राव च हर्षयुक्ता
 रामाभिषेकार्थकृतां जनानाम्।
नरेन्द्रसूनोरभिमङ्गलार्थाः
 सर्वस्य लोकस्य गिरः प्रहृष्टाः ॥ **2.15.43** ॥

महेन्द्रसद्मप्रतिमं च वेश्म
 रामस्य रम्यं मृगपक्षिजुष्टम्।
ददर्श मेरोरिव शृङ्गमुच्चं
 विभ्राजमानं प्रभया सुमन्त्रः ॥ **2.15.44** ॥

उपस्थितैरञ्जलिकारिभिश्च
 सोपायनैर्जानपदैर्जनैश्च।
कोट्या परार्धैश्च विमुक्तयानैः
 समाकुलं द्वारपदं ददर्श ॥ **2.15.45** ॥

ततो महामेघमहीधराभं
　प्रभिन्नमत्यङ्कुशमत्यसह्यम्।
रामोपवाह्यं रुचिरं ददर्श
　शत्रुञ्जयं नागमुदग्रकायम्॥ **2.15.46**॥

स्वलङ्कृतान् साश्वरथान् सकुञ्जरा -
　नमात्यमुख्यांश्च ददर्श वल्लभान्।
व्यपोह्य सूतः सहितान् समन्ततः
　समृद्धमन्तःपुरमाविवेश ह॥ **2.15.47**॥

ततोऽद्रिकूटाचलमेघसन्निभं
　महाविमानोपमवेश्मसंयुतम्।
अवार्यमाणः प्रविवेश सारथिः
　प्रभूतरत्नं मकरो यथार्णवम्॥ **2.15.48**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे पञ्चदशः सर्गः॥